इत्युक्ते तद्वचः श्रुत्वा मयैव समुदीरितम् । तदादरेण शृणु मे गणेशवचनं पुनः ॥ २६ ॥
सत्यमुक्तं कुमाराद्य तारकासुरसन्निभः । नाधुना वर्तते वीरो न भूतो न भविष्यति ॥ २७ ॥
तथाऽपि ते विचारः कः कालीं कात्यायनीं स्मर । कालि कालीति कालीति स्मरन् युद्धे जयं लभेत् ॥
उमा गौरी महाकाली महागौरी शिवा सती । शर्वाणी चण्डिका दुर्गा रुद्राणी गिरिकन्यका ॥
मृडानी पार्वती माया महामाया महेश्वरी । अपर्णा शांभवी भद्रा शुभा त्रिपुरभैरवी ॥ ३० ॥
श्रीः सर्वमङ्गला लक्ष्मीः भवानी दक्षकन्यका । आर्या हैमवती चेति स्मृत्वा जयमवाप्नुयात् ॥
एकैकमपि यन्नाम गौर्यास्तद्दुःखनाशकम् । [1]जयदं धनदं चैतत् आयुर्वृद्धिकरं परम् ॥ ३२ ॥
ततः कुमार तां गौरीं स्मृत्वा युद्धाय याहि ते । जयो भवत्यसन्दिग्धं तन्नाम जयदं यतः ॥

स्मृत्वापि गौरीं गिरिराजकन्यां धन्यां च मान्यां च कलङ्कशून्याम् ।
दुर्गामनन्यामपि भावयन्तः सद्यो भवन्त्येव हि भाग्यवन्तः ॥ ३४ ॥
स्मृत्वापि यां पातकसागरेभ्यो निर्गत्य सङ्गत्य च सौख्यसंघैः ।
स्वर्गं समेत्याप्यपवर्गमेत्य तिष्ठन्ति भाग्येन नराः शिवाग्रे ॥ ३५ ॥
यद्दृष्टिपातेन जगत्समस्तं उत्पन्नमेतत् परिपालितं च ।
कल्पावसाने प्रलयं प्रयाति सा देवता मङ्गलदेवता या ॥ ३६ ॥
यत्पादपद्मस्मरणं मुनीनां तपस्यया केवलमम्बिका सा ।
स्मृता सदा सर्वसुखप्रदात्री सैषा विधात्री सुखसागराणाम् ॥ ३७ ॥
यामन्नपूर्णां प्रवदन्ति देवाः स्तुवन्ति गन्धर्वगणा मुनीन्द्राः ।
मर्त्याश्च तत्पादरजःप्रसादात् [2]रमादिभिः सा खलु पूजनीया ॥ ३८ ॥

यस्याः कटाक्षप्रसरेण धन्यो दीनो दरिद्रः कृपणोपि धन्यः ।
मान्यः सुराणां धनसागराणां अधीश्वरः स्यादिति तां भजाम्बाम् ॥ ३९ ॥
यत्पादपद्मांबुजरेणुलेशं दधार शौरिर्धृतकूर्मरूपः ।
शेषः सहस्रेण दधार मूर्ध्ना सैषा भवानी शुभराजधानी ॥ ४० ॥

1 जयप्रदमिदं चैतत् c. 2 रमादयः c. d.

कुलाचलैः मेरुसमानधैर्यैः अतिप्रयत्नेन विधुग्रकायैः ।
यत्पादपद्माम्बुजरेणुशैलो धृतो मुदा सा गिरिजा सदाऽम्बा ॥ ४१ ॥
दिग्दन्तिभिर्यत्पदपद्मरेणुः धृतः स्वकुम्भस्थलपङ्किलोऽपि ।
मदाम्बुधारापरिवीतगात्रैः तद्धारणायासगतैः स्वतन्त्रैः ॥ ४२ ॥
यत्पादपद्माम्बुरुहार्चनाय रत्नाकरो नूतन'रत्नजालम् ।
संपादयत्यन्वहमादरेण सा किं न गौरी तव पूजनीया ॥ ४३ ॥
इयं स्तुतिर्मन्मुखपङ्कजोत्था मरन्दधारेव मुदा भवान्याः ।
मुदे प्रवृत्ताऽस्तु शुभाय नित्यं जयाय सौभाग्यसमृद्धिहेतुः ॥ ४४ ॥